# ।।प्रकरणम्-४ ।।

# ।। पुराणेषु सांख्ययोगवेदान्तविमर्शः ।।


| क्रमः | प्रकरणनाम | पृष्ठसंख्या |
|---|---|---|
| ४.१ | प्रस्तावना । | 258-288 |
| ४.२ | पुराणेषु सांख्यीयतत्त्वपरिगणनम् । | |
| ४.३ | पुराणेषु प्रमाणविषयविवेचनम् । | |
| ४.४ | पुराणेषु सत्कार्य्यवादः । | |
| ४.४.१. | असदकरणात् । | |
| ४.४.२. | उपादानग्रहणात् । | |
| ४.४.३. | सर्वसम्भवाभावात् । | |
| ४.४.४. | शक्तस्य शक्यकरणात् । | |
| ४.४.५. | कारणाभावात् । | |
| ४.५ | पुराणेषु गुणनिरूपणम् । | |
| ४.६ | पुराणेषु व्यक्ताव्यक्तभिन्नधर्म्माः । | |
| ४.६.१ | श्रीमद्भागवतपुराणे व्यक्ताव्यक्तभिन्नधर्म्माः । | |
| ४.७ | पुराणेषु प्रकृतिपरिणामः । | |

## प्रकरणम् ४ पुराणेषु सांख्ययोगवेदान्तविमर्शः ।

४.१ प्रस्तावना ।

ज्ञानविज्ञानस्य क्षेत्रे समेषां पुराणानामत्यधिकं महत्त्वमस्ति, यद्यपि पुराणेषु सर्वेषां विषयाणां विवेचनमस्ति, तथापि प्राचीना जनश्रुतयः, ऐतिहासिकं तथ्यम् , तत्त्वविज्ञानम् , धर्मशास्त्रम् , राजधर्मः, मुक्तिशास्त्रम् , इत्येषां नैकेषां विषयाणां विशेषेण विशदपूर्वकं वर्णनं कृतमस्ति । सर्वान् वेदान् दर्शं दर्शं समेषां पुराणानां रचना संजाता, अतो वेदा एव पुराणानां रचनाविषयकं कारणमस्ति तद्यथा श्रीमद्भागवतशास्त्रे लिखितमस्ति यद् -

**वेदोपनिषदां साराज्जाता भागवती कथा ।**
**अत्युत्तमा ततो भाति पृथग्भूता फलाकृतिः[1] ।।**
**यद्दर्शनं च विनिहन्त्यशुभानि सद्यः**
**श्रेयस्तनोति भवदुःखदवार्दितानाम् ।**
**निःशेषशेषमुखगीतकथैकपानाः**
**प्रेमप्रकाशकृतये शरणं गतोस्मि ।।**
**भाग्योदयेन बहुजन्मसमर्जितेन**
**सत्सङ्गमं च लभते पुरुषो यदा वै ।**
**अज्ञानहेतुकृतमोहमदान्धकार-**
**नाशं विधाय हि तदोदयते विवेकः[2] ।।**

एतादृशानि सर्वाणि पुराणान्यृषिभिर्महर्षिभिः सर्वेषां जीवानां हिताय विरचितानि सन्ति, तानि पुराणान्यालोड्य 'पुराणेषु सांख्ययोगवेदान्तविमर्शः' इति मदीयो महाशोधविषयो यथापुराणं प्रस्तूयते तद्यथा -

४.२ पुराणेषु सांख्यीयतत्त्वपरिगणनम् ।

---

[1] पद्मपुराणम्-उत्तरखण्डः २।६७

[2] पद्मपुराणम्-उत्तरखण्डः २।७५-७६

**मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।**
**षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः[१] ।।**

श्रीमद्भागवतस्य तृतीयस्कन्धस्य षड्विंशाध्यायस्यैते श्लोकाः सांख्यतत्त्वस्य परिगणनं कुर्वन्ति तद्यथा –

**अथ ते सम्प्रवक्ष्यामि तत्त्वानां लक्षणं पृथक् ।**
**यद्विदित्वा विमुच्येत पुरुषः प्राकृतैर्गुणैः ।।**
**ज्ञानं निःश्रेयसार्थाय पुरुषस्यात्मदर्शनम् ।**
**यदाहुर्वर्णये तत्ते हृदयग्रन्थिभेदनम्[२] ।।**

श्रीमद्भागवते भगवान् स्वयं कथयति यत् – सांख्यतत्त्वानां लक्षणं विदित्वा पुरुषः प्राकृतैर्गुणैर्मुक्तो भवति, अस्य पुरुषस्यात्मदर्शनं ज्ञानमिदं निःश्रेयसार्थाय तथा च हृदयग्रन्थिभेदनं करोति । अनादिरात्मा प्रकृतेः परो निर्गुणः पुरुषोस्ति, तेन स्वयं ज्योतिर्विश्वं प्रकाशितमस्ति, स एष अनादिरात्मा प्रकृतेः परो निर्गुणः पुरुषः किं करोति ? तदा श्रीमद्भागवतस्य तृतीयस्कन्धस्य षड्विंशाध्यायस्यैते श्लोकाः सांख्यतत्त्वस्य परिगणनं कुर्वन्ति तद्यथा –

**स एष प्रकृतिं सूक्ष्मां दैवीं गुणमयीं विभुः ।**
**यदृच्छयैवोपगतामभ्यपद्यत लीलया ।।**
**गुणैर्विचित्राः सृजतीं सरूपाः प्रकृतिं प्रजाः ।**
**विलोक्य मुमुहे सद्यः स इह ज्ञानगूहया[३] ।।**

सर्वे विद्वांसः कार्यकारणकर्तृत्वे कारणं प्रकृतिमेव जानन्ति, तथा च सुखदुःखानां भोक्तृत्वे प्रकृतेः परं पुरुषं विदुः, इममेव विषयमादाय स्वयं देवहूतिः भगवन्तं पृच्छां करोति तद्यथा –

---

1 सांख्यकारिका-३

2 श्री. भा. ३।२६।१-२

3 श्री. भा. ३।२६।४-५

**प्रकृतेः पुरुषस्यापि लक्षणं पुरुषोत्तम ।**
**ब्रूहि कारणयोरस्य सदसच्च यदात्मकम्[१] ।।**

श्रीमद्भागवते भगवान् स्वयं कथयति यत् - श्रीमद्भागवते भगवान् स्वयं कथयति यत् -

**यत्तत्त्रिगुणमव्यक्तं नित्यं सदसदात्मकम् ।**
**प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत् ।।**
**पञ्चभिः पञ्चभिर्ब्रह्म चतुर्दशभिस्तथा ।**
**एतच्चतुर्विंशतिकं गणं प्राधानिकं विदुः[२] ।।**

श्रीमद्भागवते भगवान् स्वयं चतुर्विंशतितत्त्वानामाख्यानां करोति, तान्यनेन प्रकारेण सन्ति तद्यथा -

४.२.१. पञ्चमहाभूतानि ।
४.२.१.१ भूः ।
४.२.१.२ आपः ।
४.२.१.३ अग्निः ।
४.२.१.४ मरुत् ।
४.२.१.५ नभः ।
४.२.२. पञ्चतन्मात्राणि ।
४.२.२.१ शब्दः ।
४.२.२.२ स्पर्शः ।
४.२.२.३ रूपम् ।
४.२.२.४ रसः ।
४.२.२.५ गन्धः ।
४.३.१. दश इन्द्रियाणि ।

---

[1] श्री. भा. ३।२६।९

[2] श्री. भा. ३।२६।१०-११

४.२.३.१ श्रोत्रम् ।

४.२.३.२ त्वक् ।

४.२.३.३ दृक् ।

४.२.३.४ रसना ।

४.२.३.५ नासिका ।

४.२.३.६ वाक् ।

४.२.३.७ करः ।

४.२.३.८ चरणः ।

४.२.३.९ मेढ्रम् ।

४.२.३.१० पायुः ।

अनेन प्रकारेण श्रीमद्भागवतपुराणस्यानुसारं विंशतितत्त्वानि परिगणितानि सन्ति, अन्यानि चत्वारि तत्त्वानि सन्ति तद्यथा –

१. मनः ।

२. बुद्धिः ।

३. अहङ्कारः ।

४. चित्तम् ।

श्रीमद्भागवते भगवान् स्वयं कथयति यत् – यत्तत्त्रिगुणमव्यक्तं नित्यं सदसदात्मकम् प्रधानं प्रकृतिं प्राहुः, अनेन प्रकारेण पञ्चविंशतितत्त्वानि भगवता स्वयं परिगणितानि सन्ति, अग्रे स्वयं भगवान् हिरण्मयं महत्तत्त्वं केन प्रकारेण सासूत ? तदा श्लोकोऽयमस्ति यत् –

**दैवात्क्षुभितधर्मिण्यां स्वस्यां योनौ परः पुमान् ।**
**आधत्त वीर्यं सासूत महत्तत्त्वं हिरण्मयम् ।।**
**विश्वमागतं व्यञ्जन् कूटस्थो जगदङ्कुरः ।**
**स्वतेजसापिबत्तीव्रमात्मप्रस्वापनं तमः [१] ।।**

[1] श्री. भा. ३।२६।१९-२०

# पुराणेषु सांख्ययोगवेदान्तविमर्शः

अनेकगुणैरुत्पन्नस्य संसारस्याद्भुतां विचारयन् भगवान् श्रीहरिः स्वमहत्तत्त्वरूपमहागुणस्य स्मरणमकरोत् , तेनाहङ्कारः समुत्पन्नः, सोहङ्कार एव चतुर्मुखाननो ब्रह्मा वर्तते, यः सर्वेषां लोकानां पितामहस्तथा हिरण्यगर्भः, इति नाम्ना सुप्रसिद्धो वर्तते । अस्मादेव महत्तत्त्वात्क्रियाशक्तिः त्रिविधोहंकारः समपद्यत, तस्य नामान्यनेन प्रकारेण वर्तन्ते तद्यथा -

१. वैकारिकोहङ्कारः ।

२. तैजसोहङ्कारः ।

३. तामसोहङ्कारः ।

तस्मादेव वैकारिकादहङ्कारान्मनस्तत्त्वमजायत, एतेषु पञ्चसु भूतेषु षष्ठं तत्त्वं चित्तात्मकमस्ति, तदेव मनो वर्तते, एकादशं तत्त्वमात्मा वर्तते, स एव आत्मा सर्वश्रेष्ठः कथितोस्ति । निश्चयात्मिका बुद्धिरस्ति तथा संशयात्मकं मनोस्ति, अथवा सङ्कल्पविकल्पात्मकं मनः । योगिनो मनसो हृषीकाणामधीश्वरं शारदेन्दीवरश्याममनिरुद्धाख्यं कथयन्ति । कर्मणां ज्ञातृत्वेन अनुमानप्रमाणेन क्षेत्रज्ञो जीवात्मा ज्ञातव्यो भवति । सृष्टिकर्ता चतुराननो ब्रह्मा मनःकर्मभ्यां सह सृष्टिमकरोत् । अहङ्करात्मकात् तत्त्वान्मनसः समुत्पत्तिः संजाता । आदिकाले सृष्टिकर्ता चतुराननो ब्रह्मा भौतिकशरीरस्योत्पत्तितः पूर्वं बुद्धि-अहङ्कार-मनः- चित्तात्मकानामन्येषां पुत्राणामुत्पत्तिमकरोत् । एते चत्वारः पितृणामपि पितरः सन्ति, अर्थात्पञ्चानां महाभूतानामपि जनकस्वरूपा वर्तन्ते, श्रीमद्भागवतस्य एकादशस्कन्धस्यैते श्लोकाः कथयन्ति यद् -

**नात्मा वपुः पार्थिवमिन्द्रियाणि**
**देवा ह्यसुर्वायुजलं हुताशः ।**
**मनोन्नमात्रं धिषणा च सत्त्व**
**महंकृतिः खं क्षितिरर्थसाम्यम् ।।**

समाहितैः कः करणैर्गुणात्मभिर्गुणो भवेन्मत्सुविविक्तधाम्नः ।

**विक्षिप्यमाणैरुत किं नु दूषणं घनैरुपेतैविगतै रवेः किम्**[१] **।।**

**क्षुत्पिपासे ततः स्यातां समुद्रस्त्वेतयोरभूत् ।**

**अथास्य हृदयं भिन्नं हृदयान्मन उत्थितम् ।।**

**मनसश्चन्द्रमा जातो बुद्धिर्बुद्धेर्गिरां पतिः ।**

अहङ्कारस्ततो रुद्रश्चित्तं चैत्यस्ततोभवत्[२]।।

तदनन्तरं तैजसाादहङ्काराद् बुद्धितत्त्वमजायत, निश्चयात्मिका बुद्धिः, अथवा बुध्यते ज्ञायते यया सेति बुद्धिः, इयं बुद्धिरात्मभोगं मोक्षं च सम्पादयति, इदमेव बुद्धेः परमं प्रयोजनमस्ति । इयं बुद्धिरात्मन आश्रयं गृहीत्वा नैकान् विषयान् प्रति प्रस्थानं करोति, अनेन कारणेन बुद्धिरात्मानुसारिणी कथिता वर्तते । श्रीमद्भागवतस्यैकादशस्कन्धस्यैते श्लोकाः कथयन्ति यद् –

**यथा हि भानोरुदयो नृचक्षुषां**

**तमो निर्हन्यान्न तु सद् विधत्ते ।**

**एवं समीक्षा निपुणा सती मे**

**हन्यात्तमिस्रं पुरुषस्य बुद्धेः ।।**

एष स्वयंज्योतिरजोप्रमेयो महानुभूतिः सकलानुभूतिः ।

एको द्वितीयो वचसां विरामो

येनेषिता वागसवश्चरन्ति[३] ।।

संशयोथ विपर्यासो निश्चयः स्मृतिरेव च।

स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक्[४] ।।

---

1 श्री. भा. ११।२८।२४-२५

2 श्री. भा. ३।२७।६०-६१

3 श्री. भा. ११।२८।३४-३५

4 श्री. भा. १।१८।१३

भगवद्वीर्यचोदितात्तामसाादहङ्काराच्छब्दतत्त्वमजायत, तस्मान्नभः, नभसः शब्दगं श्रोत्रम् , तस्यैव नभसो लक्षणं श्रीमद्भागवते भगवान् स्वय कथयति तद्यथा –

**अर्थाश्रयत्वं शब्दस्य द्रष्टुर्लिङ्गत्वमेव च ।**
**तन्मात्रत्वं च नभसो लक्षणं कवयो विदुः ।।**
**भूतानां छिद्रदातृत्वं बहिरन्तरमेव च ।**
**प्राणेन्द्रियात्मधिष्ण्यत्वं नभसो वृत्तिलक्षणम्[1] ।।**

तस्मान्नभस्तत्त्वाच्छब्दतन्मात्रात्कालगत्या विकुर्वतः स्पर्शोभवत् , तस्मादेव वायुः, अस्यैव ग्रहणकर्तृकं त्वगिन्द्रियं वर्तते । तदनन्तरं दैवस्य प्रेरणया स्पर्शतन्मात्रविशिष्टस्य वायोर्विकृतत्वाद् रूपतन्मात्रमभवत् , ततस्तेजारूपयोः समुपलब्धस्य ग्राहकं नेत्रेन्द्रियं समुद्भूतमस्ति, तस्यैव तेजसो लक्षणं श्रीमद्भागवते भगवान् स्वय कथयति तद्यथा –

**द्रव्याकृतित्वं गुणता व्यक्तिसंस्थात्वमेव च ।**
**तेजस्त्वं तेजसः साध्वि रूपमात्रस्य वृत्तयः ।।**
**द्योतनं पचनं पानमदनं हिममर्दनम् ।**
**तेजसो वृत्तयस्त्वेताः शोषणं क्षुत्तृडेव च[2] ।।**

तस्मात्तेजस्तन्मात्राद् रसग्राहिका रसना संजाता, अयमेव रसः शुद्धरूपेण एको वर्तते, किन्तु भौतिकानां पदार्थानां संयोगेन नैकविधो वर्तते, श्रीमद्भागवते भगवान् स्वय कथयति तद्यथा –

**रूपमात्राकिुर्वाणात्तेजसो दैवचोदितात् ।**
**रसमात्रमभूत्तस्मादम्भो जिह्वा रसग्रहः ।।**
**कषायो मधुरस्तिक्तः कट्वम्ल इति नैकधा ।**
**भौतिकानां विकारेण रस एको विभिद्यते[१] ।।**

---

[1] श्री. भा. ३।२७।३३-३४

[2] श्री. भा. ३।२७।३९-४०

तदनन्तरं दैवस्य प्रेरणया जलतन्मात्रविशिष्टविकृतत्वाद् गन्धतन्मात्रमभवत् , पृथ्वीगन्धग्राहकं घ्राणेन्द्रियमस्ति । अयमपि गन्ध एक एव वर्तते, किन्तु परस्परमिलितानां द्रव्यभागानां न्यूनाधिकतया नैकविधो गन्धो भवति,

आकाशादीनि पञ्चमहाभूतानि सन्ति, तेषां विशेषगुणा अनेन प्रकारेण वर्ण्णितास्सन्ति तद्यथा –

१. आकाशस्य गुणः शब्दो वर्तते ।

२. वायोर्गुणः स्पर्शो वर्तते ।

३. अग्नेर्गुणो रूपमस्ति ।

४. जलस्य गुणो रसो वर्तते ।

५. पृथिव्या गुणो गन्धो वर्तते ।

एतेषां शब्दादीनामनेके गुणभेदाः सन्ति, तद्यथा –

१. पृथिव्याः पञ्च गुणाः सन्ति ।

२. वायोर्द्वौ गुणौ वर्तेते ।

३. अग्नेः त्रयो गुणाः सन्ति ।

४. जलस्य चत्वारो गुणा वर्तन्ते ।

५. आकाशस्यैको गुणो वर्तते ।

अनेन प्रकारेण पृथिव्या अन्येषां महाभूतानामपेक्षया अधिका गुणाः सन्ति, अतः पृथिव्या पञ्चसु महाभूतेषु विशेषतमा प्रधानता वर्तते । सांख्यदर्शनस्य तत्त्ववेत्तारः पृथिव्याः शब्दस्पर्शरूपरसगन्धादीन् गुणान् कथयन्ति, तथैव जले चत्वारो गुणाः सन्ति, तत्र गन्धगुणो नास्ति । अग्नेः शब्दस्पर्शरूपादयो गुणाः सन्ति । वायोः शब्दस्पर्शाख्यौ द्वौ गुणौ वर्तेते तथा आकाशस्य शब्दनामक एक एव गुणो वर्तते । अनेन कारणेन पञ्च गुणाः सर्वलोकस्याश्रयभूतपञ्चमहाभूतेषु विद्यमाना वर्तन्ते, एतेषु पञ्चमहाभूतेषु सर्वे

---

[1] श्री. भा. ३।२७।४१-४२

प्राणिनः प्रतिष्ठिताः सन्ति, तस्य सांख्यदर्शनस्य पञ्चमहाभूतानां स्वरूपं श्रीमद्भागवतस्यैकादशस्य स्कन्धस्य चतुर्विंशाध्यायस्यैते श्रीभगवतो मुखकमलान्निर्गताः सांख्यदर्शनस्य पञ्चमहाभूतस्वरूपविषयाः नैके श्लोकाः कथयन्ति यद् -

**अथ ते सम्प्रवक्ष्यामि सांख्यं पूर्वैर्विनिश्चितम् ।**
**यद्विज्ञाय पुमान् सद्यो जह्याद्वैकल्पिकं भ्रमम् ।।**
**आसीज्ज्ञानमथो ह्यर्थ एकमेवाविकल्पितम् ।**
**यदा विवेकनिपुणा आदौ कृतयुगेयुगे[1] ।।**
**विराण्मयासाद्यमानो लोककल्पविकल्पकः ।**
**पञ्चत्वाय विशेषाय कल्पते भुवनैः सह ।।**
**अन्ने प्रलीयते मर्त्यमन्नं धानासु लीयते ।**
**धाना भूमौ प्रलीयन्ते भूमिर्गन्धे प्रलीयते ।।**
**अप्सु प्रलीयते गन्ध आपश्च स्वगुणे रसे ।**
**लीयते ज्योतिषि रसो ज्योती रूपे प्रलीयते ।।**
**रूपं वायौ स च स्पर्शे लीयते सोपि चाम्बरे ।**
**अम्बरं शब्दतन्मात्र इन्द्रियाणि स्वयोनिषु ।।**
**योनिर्वैकारिके सौम्य लीयते मनसीश्वरे ।**
**शब्दो भूतादिमप्येति भूतादिर्महति प्रभुः ।।**
**स लीयते महान् स्वेषु गुणेषु गुणवत्तमः ।**
**तेव्यक्ते संप्रलीयन्ते तत्काले लीयतेव्यये[2] ।।**
**एष सांख्यविधिः प्रोक्तः संशयग्रन्थिभेदनः ।**
**प्रतिलोमानुलोमाभ्यां परावरदृशा मया[3] ।।**

---

1 श्री. भा. ११।२४।१-२

2 श्री. भा. ११।२४।२१-२६

3 श्री. भा. ११।२४।२९

अनेन प्रकारेण सर्वाणि पञ्चमहाभूतानि भूमावेवोपलक्ष्यन्ते, यदा महत्तत्त्वम् , अहंकारः, पञ्चमहाभूतानि, एतानि सप्त तत्त्वान्यसंहतानि भवन्ति, तदा जगत आदिकारणभूतः श्रीनारायणः कालकर्मगुणोपेतः प्रवेशं करोति, तस्मादेव अयुक्तेभ्योमचेतनमण्डमुत्थितम् , तस्मादेवाचेतनादण्डाद् विराजः पुरुषस्याभिव्यक्तिः संजाता, श्रीमद्भागवते भगवान् स्वय कथयति तद्यथा –

**एतदण्डं विशेषाख्यं क्रमवृद्धैर्दशोत्तरैः ।**
**तोयादिभिः परिवृतं प्रधानेनावृतैर्बहिः ।**
**यत्र लोकवितानोयं रूपं भगवतो हरेः ।।**
**हिरण्मयादण्डकोशादुत्थाय सलिलेशयात् ।**
**तमाविश्य महादेवो बहुधा निर्बिभेद खम्[1] ।।**

कारणमयः श्रीहरिः जले स्थित्वा हिरण्मयादण्डादुत्थाय नैकधा छिद्राण्यभवन् , ततो नैकानि शरीराङ्गानि संजातानि, तेषां नामान्यनेन प्रकारेण सन्ति तद्यथा –

१. मुखम् ।
२. वागिन्द्रियम् ।
३. वागिन्द्रियस्य अधिष्ठाता अग्निदेवः ।
४. घ्राणेन्द्रियम् ।
५. घ्राणेन्द्रियस्य अधिष्ठाता वायुदेवः ।
६. चक्षुरिन्द्रियम् ।
७. चक्षुरिन्द्रियस्य अधिष्ठाता सूर्यदेवः ।
८. कर्णेन्द्रियम् ।
९. कर्णेन्द्रियस्य अधिष्ठाता दिग्देवः ।
१०. त्वचा ।
११. त्वगिन्द्रियस्य अभिमानी ओषधिः ।

[1] श्री. भा. ३।२७।५२-५३

१२. लिङ्गेन्द्रियम् ।

१३. लिङ्गेन्द्रियस्य अभिमानी अब्देवः ।

१४. गुदेन्द्रियम् ।

१५. गुदेन्द्रियस्य अधिष्ठाता मृत्युदेवः ।

१६. हस्तेन्द्रियम् ।

१७. हस्तेन्द्रियस्य अधिष्ठाता इन्द्रदेवः ।

१८. पादेन्द्रियम् ।

१९. पादेन्द्रियस्य अधिष्ठाता विष्णुदेवः ।

२०. नाड्यः ।

२१. रुधिरम् ।

२२. नद्यः ।

२३. उदरम् ।

२४. उदरस्य अभिमानी समुद्रदेवः ।

२५. हृदयम् ।

२६. मनः ।

२७. मनसोधिष्ठाता चन्द्रदेवः ।

२८. बुद्धिः ।

२९. बुद्धेरधिष्ठाता ब्रह्मदेवः ।

३०. अहंकारः ।

३१. अहंकारस्य अभिमानी रुद्रः ।

३२. चित्तम् ।

३३. चित्तस्य अभिमानी क्षेत्रज्ञदेवः ।

तदनन्तरं सर्वे देवाः तं विराजं पुरुषमुत्थापयितुमसमर्थाः संजाताः, तं विराजं पुरुषमुत्थापयितुं स्वेषु स्वेषूत्पत्तिस्थानेषु प्राविशन् , तदग्रे श्रीमद्भागवते भगवान् स्वय कथयति तद्यथा –

वह्निर्वाचा मुखं भेजे नोदतिष्ठत्तदा विराट् ।
घ्राणेन नासिके वायुर्नोदतिष्ठत्तदा विराट् ।।
अक्षिणी चक्षुषादित्यो नोदतिष्ठत्तदा विराट् ।
श्रोत्रेण कर्णौ च दिशो नोदतिष्ठत्तदा विराट् ।।
त्वचं रोमभिरोषध्यो नोदतिष्ठत्तदा विराट् ।
रेतसा शिश्नमापस्तु नोदतिष्ठत्तदा विराट् ।।
गुदं मृत्युरपानेन नोदतिष्ठत्तदा विराट् ।
हस्ताविन्द्रो बलेनैव नोदतिष्ठत्तदा विराट् ।।
विष्णुर्गत्यैव चरणौ नोदतिष्ठत्तदा विराट् ।
नाडीर्नद्यो लोहितेन नोदतिष्ठत्तदा विराट् ।।
क्षुत्तृड्भ्यामुदरं सिन्धुर्नोदतिष्ठत्तदा विराट् ।
हृदयं मनसा चन्द्रो नोदतिष्ठत्तदा विराट् ।।
बुद्ध्या ब्रह्मापि हृदयं नोदतिष्ठत्तदा विराट् ।
रुद्रोभिमत्या हृदया नोदतिष्ठत्तदा विराट्[१] ।।

किन्तु यदा चित्तस्याधिष्ठाता क्षेत्रज्ञश्चित्तेन सहितो हृदये प्राविशत् , तदा स एव विराट् पुरुषो सलिलादुदतिष्ठत् , यथा प्रसुप्तं पुरुषं प्राणेन्द्रियमनोधियः केनाप्योजसा येन विनोत्पाययितुं प्रभवन्ति, श्रीमद्भागवते भगवान् स्वय कथयति तद्यथा -

**यथा प्रसुप्तं पुरुषं प्राणेन्द्रियमनोधियः ।**
**प्रभवन्ति विना येन नोत्थापयितुमोजसा ।।**
**तमस्मिन् प्रत्यगात्मानं धिया योगप्रवृत्तया ।**
**भक्त्या विरक्त्या ज्ञानेन विविच्यात्मनि चिन्तयेत्[२] ।।**

---

[1] श्री. भा. ३।२६।६३-६९

[2] श्री. भा. ३।२६।७१-७२

अनेन प्रकारेण श्रीमद्भागवतपुराणमपि पञ्चविंशतितत्त्वानां स्तवनं कृत्वा भक्त्या विरक्त्या ज्ञानेन विविच्यात्मन्तरात्मस्वरूपं क्षेत्रज्ञं चिन्तयितुं शक्नोति । श्रीविष्णुपुराणे सांख्यीयतत्त्वपरिगणनानेन प्रकारेण कृता वर्तते यथा – महत्तत्त्वं संख्यायामेकमस्ति, अहंकारोपि द्वितीयमस्ति, पञ्च तन्मात्राणि, एकादशेन्द्रियाणि, पञ्च महाभूतानि सन्ति, यदि अव्यक्ता प्रकृतिर्नास्ति, तदा परिमाणहीना एव व्यक्तसमूहाः स्थास्यन्ति । बुद्धिरध्यवसायो नाम निश्चयोऽस्ति, अहंकारो गन्धो वर्तते, तत्र गन्धो द्विविधः कथितस्तद्यथा –

१. तन्मात्रस्य सूक्ष्मगन्धः ।

२. पृथिव्याः स्थूलगन्धः ।

कार्य्यपरम्परायामेकः साधारणो धर्मो विद्यमानो भवति, तत्सुखदुःखात्मकं मोहात्मकमस्ति, तथैव कार्यकारणं गुणात्मकं वर्तते, यथा – वस्त्रं तन्तुगुणविशिष्टो गुणान्वितमस्ति । कार्यं महत्तत्त्वादीनि सुखदुःखमोहात्मस्वरूपाणि सन्ति, अनेन कारणेन कार्य्यस्य कारणमपि सुखदुःखमोहात्मस्वरूपमस्ति, अतः चराचरे विश्वस्मिन् सुखदुःखमोहात्मस्वरूपा प्रकृतिरस्ति[1] । इत्थं सर्वेषु पुराणेषु सांख्यशास्त्रं वर्तते, तत्सांख्यशास्त्रं विना कोपि जीवः संसाराद्विमुक्तो भवितुं कदापि न शक्नोति ।

### ४.३ पुराणेषु प्रमाणविषयविवेचनम् ।

**सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रतीतिरनुमानात् ।**
**तस्मादपि चासिद्धं परोक्षमाप्तागमात्सिद्धम्[2] ।।**

प्रमीयतेनेन तदिति प्रमाणम् , तत्र दृष्टानुश्रविकस्य प्रमाणं श्रीमद्भागवतकारः प्रददाति यथा –

**एतौ पार्षदौ मह्यं जयो विजय एव च ।**
**कदर्थीकृत्य मां यद्वो बह्वक्राातामतिक्रमम् ।।**

---

[1] श्रीविष्णुपुराणम्-१।४

[2] सांख्यकारिका-६

**यस्त्वेतयोर्धृतो दण्डो भवद्भिर्मामनुव्रतैः ।**
**स एवानुमतोस्माभिर्मुनयो देवहेलनात्[1] ।।**

श्लोकेऽस्मिन् स्वयं भगवान् मुनिगणं कथयति यद् - एतौ जयविजयौ मम पार्षदौ वर्तेते, तौ कदर्थीकृत्य भवतामपराधः कृतोस्ति, अतो ममावज्ञां विधाय भवद्भिः प्रदत्तो दण्डो मम कृतेप्यभिमतो वर्तते, अनेन प्रकारेण कर्दमेन कर्दमस्य शुद्धिः कदापि भवितुन्नार्हति, तथैव सुरापानेन सुरापानस्य शुद्धिः कदापि भवितुन्नार्हति, अतः प्रमाणस्य स्वरूपमस्ति यद् -

आत्मा वा अरे दृष्टव्यः श्रोतव्यो मन्तव्यः[2] ।।

इत्थं ज्ञानस्य साधकमेव प्रमाणं वर्तते, अतोसन्निकृष्टः प्रमातरि अनारूढोनधिगत इति वाच्यम् ? अस्याः प्रमाया लक्षणे अनधिगतपदेन स्मृतिव्यावृत्तिः तथा अवधारणपदेन संशयव्यावृत्तिर्भवति । सांख्यकारः त्रिविधानि प्रमाणानि कथयति यथा -

१. प्रत्यक्षप्रमाणम् ।
२. अनुमानप्रमाणम् ।
३. शब्दप्रमाणम् ।

एतान्येव त्रिविधानि प्रमाणानि ध्यायं ध्यायं पुराणकारैः समस्तानि पुराणानि विरचितानि सन्ति । विद्वांसः प्रामुख्येन प्रत्यक्षप्रमाणं स्वीकुर्वन्ति तथा च सांख्यमतानुसारिणो विद्वांसः शास्त्रप्रमाणमेव विश्वसन्ति । कश्चिदपि साधको ब्रह्मत उपरि भूत्वाकाशस्वरूपं निर्गुणं ब्रह्म प्राप्नोति, तस्मिन्स्थाने प्रत्यक्षानुमानोपमानशब्दाख्यानां चतुर्ण्णां प्रमाणानां तल्लक्षणानां चावश्यकता नास्ति, एतद्विचार्य्य सांख्यदर्शनप्रमाणसंख्यास्वरूपं श्रीमद्भागवतस्य एकादशस्कन्धस्य अष्टाविशाध्यायस्य भूतभावनस्य परमकारुणिकस्य भगवतो

---

1 श्री. भा. ३।१६।२-३

2 बृ. उ. २।४।५

मुखकमलान्निर्गताः सांख्यदर्शनस्य प्रमाणसंख्यास्वरूपविषयाः श्लोकाः कथयन्ति यद् –

**एतद्विद्वान् महदुदितं ज्ञानविज्ञाननैपुणम् ।**
**न निन्दति न च स्तौति लोके चरति सूर्यवत् ।।**
**प्रत्यक्षेणानुमानेन निगमेनात्मसंविदा ।**
**आद्यन्तवदसज्ज्ञात्वा निःसङ्गो विचरेदिह[1] ।।**
**यदि स्म पश्यत्यसदिन्द्रियार्थं**
**नानानुमानेन विरुद्धमन्यत् ।**
**न मन्यते वस्तुतया मनीषी**
**स्वाप्नं यथोत्थाय तिरोदधानम्[2] ।।**
**यन्नामाकृतिभिर्ग्राह्यं पञ्चवर्णमबाधितम् ।**
**व्यर्थेनाप्यर्थवादोयं द्वयं पण्डितमानिनम्[3] ।।**

अनेन प्रकारेण सर्वेषु पुराणेषु सांख्यदर्शनस्य पुराणेषु प्रमाणविषयस्य विवेचनं वर्ण्णनं वा विशेषेण कृतमस्ति ।

---

1 श्री. भा. ११।२८।७-८

2 श्री. भा. ११।२८।३२

3 श्री. भा. ११।२८।३७

४.४ पुराणेषु सत्कार्य्यवादः ।

**असदकरणादुपादानग्रहणात्सर्वसम्भवाभावात् ।**

**शक्तस्य शक्यकरणात्कारणाभावाच्च सत्कार्य्यम्**[१] ।।

भारतीयदर्शनशास्त्राणां मुख्यं लक्ष्यं दुःखमुक्तिर्वामोक्षो वर्तते, आत्यन्तिकायास्तथैकात्मिकाया दुःखमुक्तेरिच्छैव दर्शनशस्त्राणां मूलमस्ति, केवलं बुद्धिव्यवसायार्यां साधनमेव दर्शनं नास्ति, मुग्धा बुद्धिर्दर्शनशास्त्रे प्रवृत्ता न भवति, परन्तु दुःखं प्रयोजनवती बुद्धिदर्शनशास्त्रे प्रवर्तते । सांख्याचार्याणामयं सिद्धान्तो वर्तते यथा -

सतः सज्जायते ।

सत एव सत्प्रभवति, अस्तित्ववतो वस्तुनोस्तित्ववद्वस्तूत्पद्यते, स्वस्य उत्पत्तेः पूर्वं कारणेस्तित्वं भवति, अथवा कारणमेव कार्य्यस्याव्यक्तावस्था वर्तते, स्वोत्पत्तेः पूर्वं कार्यं कारणेव्यक्तभावेन वा सूक्ष्मरूपेण स्थितं कार्यं वयमिन्द्रियजेन प्रत्यक्षं कर्तुं न प्रभवामः, किन्तु तस्मात्कार्यं तदा कारणेस्तित्वं नायाति इत्थं कथयितुं न कोपि शक्नोति, अतो यद्वस्तु यस्मिन्नास्ति, ततः कदाति नोत्पद्यते । कार्यं कारणस्य परिणामो वर्तते, अनेन प्रकारेण सांख्याचार्य्याणां विचारानुसारमुत्पत्तस्तथा विनाशस्यार्थ आविर्भावस्तथा तिरोभावो वर्तते । सांख्याचार्य्या उत्पत्तेः पूर्वमपि कार्ये कारणे चाव्यक्तरूपेणास्तित्वं मन्यन्ते, इदमेव सांख्याचार्य्याणां मतमनुसरन्तः सत्कार्यवादं स्वीकुर्वन्ति, अयं सत्कार्यवादः पञ्चविधो वर्तते, तस्य सत्कार्यवादस्य पञ्चविधस्य नामान्यनेन प्रकारेण सन्ति तद्यथा -

४.४.१. असदकरणात् ।

४.४.२. उपादानग्रहणात् ।

४.४.३. सर्वसम्भवाभावात् ।

४.४.४. शक्तस्य शक्यकरणात् ।

---

[1] सांख्यकारिका-९

४.४.५. कारणाभावात् ।

सत्कार्यवादस्य पञ्चानां प्रकाराणां चर्चां सर्वेषु पुराणेष्वनेन प्रकारेण वर्तते तद्यथा –

४.४.१. असदकरणात् ।

सत्कार्यवादस्य प्रथमोयं सिद्धान्तो वर्तते यद् – असदकरणात् । किमपि कार्यमुत्पूर्वं स्वकारणे शक्तिरूपेण विद्यमानं न भवति तदा तत्कार्यं कदापि नोत्पद्यते, यथा – असद्घटादीनि कार्य्याणि सन्मृदादितः समुत्पन्नानि भवन्ति, मतमिदं योग्यमस्ति, तदा सत्त्वासत्त्वे घटादिनी कार्य्यस्यैव धर्मयुते वर्तेते, यथा – कुण्डलत्वस्य सुवर्णं सुवर्णकारस्य व्यापारेण कटकत्वयुतं सुवर्णं भवति, तथैवासत्त्वधर्मयुतानि घटादीनि कार्याणि कारणव्यापरानन्तरं सद्धर्मयुतं भवति, तद्योग्यं नास्ति, अत्रासत्त्वस्य धर्मो गणितो वर्तते तथा धर्मो धर्मि विना स्थातुं न शक्नोति अतोसत्त्वधर्मस्याश्रयस्तस्योत्पत्तेः प्रथमं स्वीकार आवश्यको भवति, अनेन सिद्धमिदं भवति यद् – उत्पत्तेः पूर्वमपि कार्यं कारणरूपेण विद्यमानं भवत्येव ।

अत्र शङ्केयं भवति यद् – घटादीनि कार्य्याणि स्वोत्पत्तेः प्रागेव विद्यमानमस्ति तदा तस्योत्पत्तये कुम्भकारादीनां व्यापारस्यावश्यकता नास्ति, अस्याः शङ्काया निराकरणं भवति यत् – कुम्भकारादीनां व्यापारेण घटादीनां कार्य्याणां केवलमभिव्यक्तिर्भवति । कारकव्यापारस्य प्राक्कारणरूपेढ नभिव्यक्तस्य घटस्यानन्तरं कारकव्यापारेणाभिव्यक्तं भवति यथा – तिलेषु तैलमनभिव्यक्तमस्ति, तस्य पीडनेन व्यापारेणााभिव्यक्तं भवति यथा – गवां दुग्धस्थितेष्ववयवेष्वस्तित्वयुतं दुग्धमेव दोहनव्यापारेणाभिव्यक्तं भवति, अनेन प्रकारेण पीडनव्यापारस्तथा दोहनव्यापारः केवलोभिव्यञ्जको वर्तते तथा तैलस्य तिलानि दुग्धस्य गावः कारणानि कथितानि सन्ति, तथैव दण्डादिनो घटरूपिणः कार्यस्याभिव्यञ्जकत्वेन घटस्य कारणं कथयन्ति, तदेव

सत्कार्यवादस्य प्रथमस्यास्य सिद्धान्तस्य चर्चा सर्वेषु पुराणेषु कथिता वर्तते तद्यथा –

४.४.२. उपादानग्रहणात् ।

सत्कार्यवादस्य द्वितीयोयं सिद्धान्तो वर्तते यद् – उपादानग्रहणात् । यत्कार्य्यमुत्पत्तेः पूर्वं तस्य कारणे विद्यमानं न भवति, तदा वयममुकं कार्य्यमुत्पादयितुमुपादानकारणस्य ग्रहणं कुर्मस्तदेवोपादानग्रहणम् । आम्रफलम् उत्पादयितु वयमाम्रबीजस्य वपनं कुर्मः, तत्रार्कबीजस्य वपनं कदापि न कुर्मः, यदुत्पत्तेः पूर्वमाम्रफलम् उत्पादयितु वयमाम्रबीजस्यैव वपनं कुर्मः, तत्रार्कबीजस्य वपनं कदापि न कुर्मः, अनेन कारणेनोत्पत्तेः पूर्वमाम्रफलस्यास्तित्वमाम्रबीजे पश्यामः, तथैव असत्त्वस्यार्कस्यास्तित्वमर्कबीजे पश्यामः, परिणामतोमुकस्य कार्य्यस्यामुकमेव उपादानग्रहणमस्ति, इति नियमो जगति वास्तविकरूपेण प्रवर्तते । नियमोयं दर्शयति यद् – आम्रबीज आम्रफलं शक्तिरूपेण विद्यमानमस्ति, किन्तु सा शक्तिरर्कबीजे भवितुं नार्हति, इत्थमाम्रबीजाम्रफलयोर्मध्ये नियतः सम्बन्धो वर्तते, सः सम्बन्धः तादात्म्यस्य सम्बन्धोस्ति, तत्र कारणमस्ति यत् – कार्यं स्वयमेव कारणस्यैका व्यवस्था वर्तते, तदेव सत्कार्यवादस्य द्वितीयस्यास्य सिद्धान्तस्य चर्चा सर्वेषु पुराणेषु कथिता वर्तते तद्यथा –

४.४.३. सर्वसम्भवाभावात् ।

सत्कार्यवादस्य तृतीयोयं सिद्धान्तो वर्तते यत् – सर्वसम्भवाभावात् । यदुत्पत्तेः पूर्वं कार्य्यमसन्मन्यते, तत्काले सत्कारणासत्कार्य्ययोर्मध्ये कश्चिदपि सम्बन्धो भवितुं नार्हति, कारणमस्ति यत् – सम्बन्धस्तु द्वयोर्वस्तुनो मध्ये सम्भवितुं शक्यते । यस्मात्कार्य्यादसम्बद्धं भूत्वा कार्य्यमुत्पत्तिमत्कार्य्यं कल्पितुं भवति तदा तद्वदसम्बद्धं कार्य्यं कारणे समानयुतं कारणं कार्य्यमेवमुत्पादयितुं शक्यते । सारांशो वर्तते यद् – आम्रबीजादाम्रवृक्षस्तथा पिप्पलादयो वृक्षा भवितुमर्हन्ति, किन्तु

जगत्यस्मिन्नेतादृशी काप्यव्यवस्था नास्ति, अतो जगत्यस्मिन्नेतादृशी व्यवस्था वर्तते यद् - अमुकस्मात् कारणादमुकं कार्य्यमुत्पन्नम्भवति, अतः कारणं कार्य्येण सह तादात्म्यसम्बन्धे स्थित्वा तदेवोत्पादयति । स्यादेतत् - असम्बद्धमेव कारणैः कस्मात्कार्य्यं जन्यते ? तथा चासदेवोत्पत्स्यतेतः कथयति - सत्कार्यवादस्य तृतीयोयं सिद्धान्तो वर्तते यत् - सर्वसम्भवाभावात् । असम्बद्धस्य जन्यत्वेसम्बद्धत्वाविशेषेण सर्वं कार्यजातं सर्वस्माद्भवेत् , न चैतदस्ति, तस्मान्नासम्बद्धमसम्बद्धेन जन्यतेपि तु सम्बद्धं सम्बद्धेन जन्यते[1], तदेव सत्कार्यवादस्य तृतीयस्यास्य सिद्धान्तस्य चर्चा सर्वेषु पुराणेषु कथिता वर्तते तद्यथा -

४.४.४. शक्तस्य शक्यकरणात् ।

असम्बद्धमपि यत्तदेव करोति यत्र यत्कारणं शक्तं भवति । शक्तिश्च कारणस्य कार्यस्य दर्शनादेवागम्यते, तद्यथा - मृद्रूपे कारणे घटरूपं कार्य्यं समुत्पादयितुं शक्तिरस्ति, सा शक्तिः पटमुत्पादयितुं नास्ति, अतः सा मृद् घटमुत्पादयितुं शक्तिरस्ति, किन्तु सा पटमुत्पादयितुं शक्तिर्नास्ति, अनेन विज्ञायते यत्कारणगताया उत्पादकशक्तेर्ज्ञानं कार्य्यमवलोक्य भवति ।

सांख्याचाय्याणामतमिदमस्ति यत् - तैलोत्पत्तेः पूर्वं तिलेषु विद्यमानैव तैलोत्पादकत्वशक्तिः संनिहिता भवति, तस्याः तैलोत्पादकत्वशक्तेर्ज्ञानं तैलानन्तरमेव अनुमानेन भवितुमर्हति । सा शक्तिः शक्तकारणाश्रया सर्वत्र वा स्याच्छक्य एव वा ? सर्वत्र चेत्तदा तदवस्थैवाव्यवस्था । तैलमवलोक्य तिलेषु तैलोत्पादकत्वशक्तेरनुमानं भवितुं नार्हति कारणमस्ति यद् - असम्बद्धो हेतुः तैलसाध्यस्यानुमापकं केन प्रकारेण भवितुमर्हति ? अतोशक्तकारणादशक्यस्य कार्य्यस्योत्पत्तिः सम्भवितुं नार्हति तद्यथा - कुम्भकारः शक्तोपादानकारणभूताया मृद एव शक्यकार्य्यं घटं

[1] सांख्यकारिका-९

समुत्पादयति, अतः शक्तियुतमेव शक्तं भवति । शक्तिरुभयाश्रया सम्बन्धविशेषा वर्तते, अतः सा शक्याभावे स्थातुं न शक्नोति, अनेन कारणेनैवउत्पत्ततेः पूर्व्वं कार्य्यस्य कारणे विद्यमानता स्वीकृता वर्तते , सत्कार्यवादस्य चतुर्थोयं सिद्धान्तो वर्तते यत् - शक्तस्य शक्यकरणात् । तदेव सत्कार्यवादस्य चतुर्थस्यास्य सिद्धान्तस्य चर्चा सर्वेषु पुराणेषु कथिता वर्तते तद्यथा -

४.४.५. कारणाभावात् ।

कारणस्य या जातिर्भवति, सैव जातिः कार्य्यस्य भवति, यथा - गोधूमाद् गोधूमा एव जायन्ते, आम्रबीजादाम्रबीजान्ये भवन्ति, अथवा गोधूमात्कदापि आम्रफलानि भवितुं नार्हन्ति, अतः कार्य्यं कारणात्कमेव भवति, कार्य्यं कारणाद्भिन्नं कदापि न भवति । कारणं यदा सद्भवति, तदा कार्य्यमसत्कथं भवितुमर्हति ? कारणगतां सत्तां विना विपरीता सत्ता भवितुन्नार्हति । सांख्याचार्य्याः कारणकार्य्ययोरभेदं स्वीकुर्व्वन्तः कथयन्ति यद् - न पटस्तन्तुभ्यो भिद्यते तद्धर्म्मत्वादिति, अतो यद्यतो भिद्यते तत्तस्य धर्मो भवितुं नार्हति यथा - गौरश्वस्य । धर्मश्च पटस्तन्तूनाम् , तस्मान्नार्थान्तरम् । उपादानोपादेयभावाच्च नार्थान्तरं तन्तुपटयोः । योग्यतावच्छिन्ना धर्मिणः शक्तिरेव धर्मः, अर्थाद् धर्मिणो योग्यतायुता शक्तिरेव धर्मः । मृत्तिका घटमुत्पादयितुं शक्तिं धारयति, इयमेव शक्तिः तस्या मृत्तिकाया धर्मो वर्तते, अस्य सत्कार्यवादस्य पञ्चमोयं सिद्धान्तो वर्तते यत् - कारणाभावात् । तदेवास्य सत्कार्यवादस्य पञ्चमस्यास्य सिद्धान्तस्य चर्चा सर्वेषु पुराणेषु कथिता वर्तते तद्यथा -

४.५ पुराणेषु गुणनिरूपणम् ।

प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः ।

अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः[१] ।।

सांख्यदर्शनमतानुसारं प्रधानाद्वा प्रकृतितो जगतः परिणतिर्वर्तते । प्रधानः त्रिगुणात्मकोस्ति । सत्त्वरजस्तमांसीति त्रयो गुणाः सन्ति, एते त्रयो गुणा द्रव्यरूपा वर्तन्ते, तत्र कारणमस्ति यत्ते परस्परं तथा पुरुषेण सह संयोगविभागधर्माणो भवन्ति, तेषु लघुत्वगुरुत्वादयो धर्माः सन्ति , अतः सत्त्वादयो गुणा नित्यं परिणमनशीलाः सन्ति, ते परस्परं गौणमुख्यभावं धृत्वा विभिन्नेन सन्निवेशेषेण प्रगटिता भवन्ति यथा - सर्वमिदं गुणानां सन्निवेशमात्रमिति परमार्थतो गुणात्मानः[२] । अनेन सन्निवेशेषमेव जगतो वैचित्र्यमस्ति । जगतो भिन्नानि वस्तूनि सत्त्वादिगुणसमूहाद्भिन्नानि न सन्ति, अनेन कारणेन सांख्यदर्शने कार्य्यस्योपादानकारणयोरभेदः स्वीकृतो वर्तते ।

सत्त्वादयो त्रयो गुणा अतीन्द्रियाः सन्ति । कपिलमुनिरपि गुणानां कार्यमेव प्रत्यक्षम् , न शक्तिमात्रेणावस्थानामसंवेद्यात् । अस्य जगतः सर्वे विषयाः सुखदुःखमोहात्मकाः सन्ति तथा कार्य्याणि वर्तन्ते, अनेन कारणेन तेषां सर्वेषां विषयाणां मूलं कारणद्रव्याणि भवितुमर्हन्ति तथा चैतानि कारणद्रव्याणि सुखात्मकानि दुःखात्मकानि मोहात्मकानि च भवितुमर्हन्ति । कारणं विना किमपि कार्यं संभवितुं नार्हति, एवं कारणगुणाः कार्यगुणानारभन्ते तद्यथा -

१. सुखात्मकस्य मूलं कारणद्रव्यमेव सत्त्वगुणः ।

२. दुःखात्मकस्य मूलं कारणद्रव्यमेव रजोगुणः ।

३. मोहात्मकस्य मूलं कारणद्रव्यमेव तमोगुणः ।

एते त्रयो गुणाः शब्दस्पर्शरूपरसगन्धादिरहिताः सन्ति, नन्वेवं कारणद्रव्येषु रूपाद्यभावे तन्मात्ररूपादेः किं कारणमिति चेत् ?

---

1 सांख्यकारिका-१२

2 योगवार्तिकम् - २.१८

स्वकारणद्रव्याणां न्यूनाधिकभावेनान्योयं संयोगविशेष एव, हरीद्रादीनां संयोगस्य तदुभयारब्धद्रव्ये रक्तरूपादिहेतुत्वदर्शनात् । दृष्टानुसारेण स्वाश्रयहेतुसंयोगानामेव रूपादिहेतुसम्भवे तार्किकाणां परमाणुषु रूपकल्पनं हेयमिति ।

सत्त्वगुणः प्रकाशाय वर्तते, रजोगुणः प्रवृत्तये वर्तते, तमोगुणो नियमनाय वर्तते । सत्त्वगुणस्य धर्मो लघुताप्रकाशमयोस्ति । रजोगुणस्य धर्मः संश्लेषजनक उत्तेजकः क्रियाशीलयुतश्चास्ति तथैव तमोगुणस्य धर्मो गुरुतामयस्तथावरणमयो वर्तते । सत्त्वगुणो लघुत्वात्तत्प्रभावेणाग्न्यादीनामूर्ध्वगमनं तथा वाय्वादीनां तिर्यग्गमनं शक्यं भवति, तथा च सत्त्वगुणस्य लघुताधर्मत्वस्य परिणामेन चक्षुरादीनीन्द्रियाणि अल्पसमये विषयान् ग्रहीतुं समर्थानि भवन्ति, परिणामतश्चेतनवन्ति जायन्ते । सत्त्वगुणो लघुत्वात्प्रकाशमयत्वाच्च स्वयं क्रियाहीनोस्ति । तमोगुणोपि स्वयं क्रियाहीनोस्ति, अतः तमोगुणो निद्रायाः तन्द्राया आलस्य च जनको वर्तते ।

एते त्रयो गुणाः परस्परमिथुनवृत्तयः सन्ति, अत एको गुणो द्वौ गुणौ विना संभवो नास्ति, एतेषां त्रयाणां परस्परमविनाभावसंबन्धोस्ति । अस्मिन्धरातले सर्वेषु विषयेषु सर्वत्र सर्वे गामिनो गुणाः सन्ति । सत्त्वरजोतमसामनेके प्रकारा वर्तन्ते, केचन अणुपरिमाणमयास्तथा केचन विभुपरिमाणुमयास्सन्ति, परन्तु मध्यमपरिमाणयुतः कश्चिदपि गुणो नास्ति । एते त्रयो गुणाः समबला वर्तन्ते, यदा तेषु गुणप्रधानस्य भावो यदा न भवति, तदा ते कार्य्यरूपां सृष्टिं कर्तुं न प्रभवन्ति, किन्तु सत्त्वं सत्त्वरूपे, रजो रजोरूपे, तमः तमोरूपे परिणमन्ति, अयमेव सदृशपरिणामो वा सरूपपरिणामो वर्तते, इदमेव पुराणेषु गुणनिरूपणस्य वर्णनं सर्वाणि पुराणानि कुर्व्वन्ति तद्यथा - तेषु श्रीमार्कण्डेयपुराणं गुणनिरूपणस्य चर्चामनेन प्रकारेण करोति यथा -

पुरुषाधिष्ठितं नित्यमनित्यमिव च स्थितम् ।
प्रधानं कारणं यत्तदव्यक्ताख्यं महर्षयः ।।

**यदाहुः प्रकृतिं सूक्ष्मां नित्यां सदसदात्मिकाम् ।**
**ध्रुवमक्षय्यमजरमप्रमेयं नान्यसंश्रयम् ।।**
**गन्धरूपरसैर्हीनं शब्दस्पर्शविवर्जितम् ।**
**अनाद्यन्तं जगद्योनिं त्रिगुणं प्रभवाप्ययम् ।।**
**असाम्प्रतमविज्ञेयं ब्रह्माग्रे समवर्तत ।**
**प्रलयस्यानु तेनेदं व्याप्तमासीदशेषतः ।।**
**गुणसाम्यात्ततः तस्मात्क्षेत्राधिष्ठितान्मुने ।**
**गुणभावात्सृज्यमानात्सर्गकाले ततः पुनः[१] ।।**

इममेव गुणनिरूपणनामानं विषयमादाय देवीभागवतमपि स्वमतं प्रस्थापयति तद्यथा –

**सृष्ट्वाखिलजगदिदं सदसत्स्वरूपं**
**शक्त्या स्वया त्रिगुणया परियाति विश्वम् ।**
**संहृत्य कल्पसमये रमते तथैका**
**तां सर्वभूतजननीं मनसा स्मरामिः[२] ।।**

यद्यपि सृष्टिकता ब्रह्मैव सर्वेषु पुराणेषु कथितो वर्ण्णितो वर्तते, तथापि तत्सृष्टिकर्तृत्वमन्यमस्ति, ब्रह्मा सृष्टिं करोति, तदपि नितरां सत्यं वर्तते, परन्तु तद्रूपे माया, सृष्टिस्तथा प्रकृतिरपि सृष्टिकर्त्री वर्तते, तत्स्वभावोस्ति । ब्रह्मा स्वस्वभाववशेन सृष्टिं करोति, सृष्टिकरणाय तत्स्वभावो विवशो वर्तते । सः स्वतन्त्रो नास्ति, न स्वेच्छया सृष्टिं करोति, सः स्वभावस्याधीनोस्ति, प्रकृती राजसी वर्तते, रजोगुणप्रधानस्य कार्य्यमेव सर्जनमस्ति । ब्रह्मविष्णुशिवानां कार्यं कर्तव्यं प्रकृतिवशाद्भवति । त्रिगुणात्मिकायाः प्रकृतेः कारणमेव सर्गस्य स्वामी ब्रह्मा वर्तते, स्थितेः स्वामी विष्णुर्वर्तते, एवं लयस्य स्वामी शंकरो वर्तते ।

---

[1] श्रीमार्कण्डेयपुराणम्–४५।३१–३६

[2] श्रीदेवीभागवतम्–१।२।५०८

४.६ पुराणेषु व्यक्ताव्यक्तभिन्नधर्म्माः ।

**हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् ।**

**सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम्**[1] ।।

सांख्यदर्शने प्रधानादारभ्य चतुर्विंशतितत्त्वानि द्विविधानि कृतानि सन्ति तद्यथा –

१. व्यक्ततत्त्वम् ।

२. अव्यक्ततत्त्वम् ।

महतत्त्वादारभ्य पञ्चमहाभूतादीनि त्रयोविंशतित्त्वानि व्यक्ततत्त्वानि सन्ति, यदा मूलप्रकृतिरेवाव्यक्ततत्त्वमस्ति । व्यक्ततत्त्वाव्यक्ततत्त्वानां लक्षणानि सांख्याचार्य्यैः अनेन प्रकारेण कथितानि सन्ति तद्यथा –

१. व्यक्ततत्त्वम् ।

व्यक्तपदार्थमात्रमुपादानकारणम्भवति, तेन तानि व्यक्ततत्त्वानि आविर्भावयुतानि तिरोभावविशिष्टानि च सन्ति, किन्तु मूलप्रकृतेरेकमपि कारणं नास्ति, अतो मूलप्रकृतेरुत्पत्तिरपि नास्ति तथा कालान्तरे लयो न भवति, अतो मूलप्रकृतिर्नित्या वर्तते ।

२. अव्यक्ततत्त्वम् ।

अव्यक्तपदार्थमात्रमुपादानकारणं न भवति, तेन तान्यव्यक्ततत्त्वानि आविर्भावयुतानि तिरोभावविशिष्टानि च न सन्ति, किन्तु मूलप्रकृतेरेकमपि कारणं वर्तते, अतो मूलप्रकृतेरुत्पत्तिरपि भवति तथा कालान्तरे लयो भवति, यथा – कार्यं कारणे व्याप्तं न भवति , मृद्घटे मृत्तिका भवति, किन्तु मृत्तिकायां घटो न भवति, इति कथयितुं न शक्नुमः । अव्यक्ततत्त्वानि

---

[1] सांख्यकारिका-१०

सुखदुःखमोहात्मकानि सन्ति । तत्त्वज्ञानिनां मते जगत्यस्मिन् ज्ञानं विना कश्चिदपि बाह्यपदार्थो ग्राह्यविषयो नास्ति । तदेव ज्ञानं कदाचिद् घटरूपे, कदाचित् पटरूपे, कदाचिद् अन्यरूपे, एकस्मिन् समये नानारूपे भासितं भवति । बाह्यानि सकलानि वस्तूनि ज्ञानस्य कल्पनामात्ररूपाणि भवन्ति, किन्तु सांख्यदर्शनं मतस्यास्य विरोधं करोति, तन्मते बाह्यपदार्थाः कल्पनारूपा न सन्ति, इदमेव पुराणेषु व्यक्ताव्यक्तभिन्नधर्म्माणां वर्णनं सर्वाणि पुराणानि कुर्व्वन्ति तद्यथा –

४.६.१ श्रीमद्भागवतपुराणे व्यक्ताव्यक्तभिन्नधर्म्माः ।

**द्रव्याकृतित्वं गुणता व्यक्तिसंस्थात्वमेव च ।**
**तेजस्त्वं तेजसः साध्वि रूपमात्रस्य वृत्तयः ।।**
**द्योतनं पचनं पानमदनं हिममर्दनम् ।**
**तेजसो वृत्तयस्त्वेताः शोषणं क्षुत्तृडेव च[1] ।।**

चतुर्विंशतितत्त्वानामाख्यानां करोति, तान्यनेन प्रकारेण सन्ति तद्यथा – एतेषु पञ्चसु भूतेषु षष्ठं तत्त्वं चित्तात्मकमस्ति, सप्तमं तत्त्वं बुद्धिरस्ति तथा तदनन्तरमष्टमं तत्त्वमहङ्कारात्मकमस्ति । तेजस आधारो वायुरस्ति, वायोराकाशः, आकाशस्याश्रयोहङ्कारो वर्तते, तथा चाहङ्कारस्याधिष्ठात्री समष्टिः बुद्धिरस्ति, श्रीमद्भागवतस्यैकादशस्कन्धस्यैते श्लोकाः कथयन्ति यद् –

**शोकहर्षभयक्रोधलोभमोहस्पृहादयः ।**
**अहङ्कारस्य दृश्यन्ते जन्म मृत्युश्च नात्मनः ।।**
**देहेन्द्रियप्राणमनोभिमानो जीवोन्तरात्मा गुणकर्ममूर्तिः ।**
**सूत्रं महानित्युरुधेय गीतः संसार आधावति कालतन्त्रः[2] ।।**

सहस्रशिरसं साक्षद्यमनन्तं प्रचक्षते ।

---

[1] श्री. भा. ३।२७।३९–४०

[2] श्री. भा. ११।२८।१४–१५

**सङ्कर्षणाख्यं पुरुषं भूतेन्द्रियमनोमयम् ।।**

**कर्तृत्वं करणत्वं च कार्यत्वं चेतिलक्षणम् ।**

**शान्तघोरविमूढत्वमिति वा स्यादहंकृतेः ।।**

**वैकारिकाद्विकुर्वाणान्मनस्तत्त्वमजायत ।**

**यत्सङ्कल्पविकल्पाभ्यां वर्तते कौमसम्भवः[१] ।।**

**द्रव्याकृतित्वं गुणता व्यक्तिसंस्थात्वमेव च ।**

**तेजस्त्वं तेजसः साध्वि रूपमात्रस्य वृत्तयः ।।**

**द्योतनं पचनं पानमदनं हिममर्दनम् ।**

**तेजसो वृत्तयस्त्वेताः शोषणं क्षुत्तृडेव च[२] ।।**

चतुर्विंशतितत्त्वानामाख्यानां करोति, एतेषु पञ्चसु भूतेषु षष्ठं तत्त्वं चित्तात्मकमस्ति, सप्तमं तत्त्वं बुद्धिरस्ति तथा तदनन्तरमष्टमं तत्त्वमहङ्करात्मकमस्ति । तेजस आधारो वायुरस्ति, वायोराकाशः, आकाशस्याश्रयोहङ्कारो वर्तते, तथा चाहङ्कारस्याधिष्ठात्री समष्टिः बुद्धिरस्ति, श्रीमद्भागवतस्यैकादशस्कन्धस्यैते श्लोकाः कथयन्ति यद् -

शोकहर्षभयक्रोधलोभमोहस्पृहादयः ।

अहङ्कारस्य दृश्यन्ते जन्म मृत्युश्च नात्मनः ।।

देहेन्द्रियप्राणमनोभिमानो जीवोन्तरात्मा गुणकर्ममूर्तिः ।

सूत्रं महानित्युरुधेय गीतः संसार आधावति कालतन्त्रः[३] ।।

सहस्रशिरसं साक्षद्यमनन्तं प्रचक्षते ।

सङ्कर्षणाख्यं पुरुषं भूतेन्द्रियमनोमयम् ।।

कर्तृत्वं करणत्वं च कार्यत्वं चेतिलक्षणम् ।

---

1 श्री. भा. ३।२६।२४-२५

2 श्री. भा. ३।२७।३९-४०

3 श्री. भा. ११।२८।१४-१५

**शान्तघोरविमूढत्वमिति वा स्यादहंकृतेः ।।**
**वैकारिकाद्विकुर्वाणान्मनस्तत्त्वमजायत ।**
**यत्सङ्कल्पविकल्पाभ्यां वर्तते कौमसम्भवः[१] ।।**

अनेन प्रकारेण पुराणेषु व्यक्ताव्यक्तभिन्नधर्म्माणां निरूपणं विधाय चतुर्थप्रकरणस्य षष्ठमुपप्रकरणमत्रैव समाप्यते ।

४.७ पुराणेषु प्रकृतिपरिणामः ।

**कारणमस्त्यव्यक्तं प्रवर्तते त्रिगुणतः समुदयाच्च ।**
**परिणामतः सलिलवत्प्रतिप्रतिगुणाश्रयविशेषात्[२] ।।**

सांख्यदर्शनस्य परिणामवाद उपादानकारणं प्रति गच्छति यद् - यस्याः प्रकृतेर्विकारः सकलं जगद्वर्तते । मूलप्रकृतेः स्वरूपं त्रिगुणात्मकमस्ति । इयं प्रकृतिरतिसूक्ष्मत्वादस्माकं विषयभूता भवितुं नार्हति । कार्यस्यापेक्षया कारणपदार्थाः सूक्ष्मास्तथा व्यापकाश्च भवन्ति, अतः कार्यं कारणेऽव्यक्ताकारे भवति । भौतिकस्य कार्यस्यापेक्षया तदुपादानं स्थूलं सूक्ष्मं च वर्तते, इन्द्रियाणां तथा तन्मात्रस्यापेक्षया व्यापकं स्थूलं सूक्ष्मं च वर्तते, इन्द्रियाणां तथा तन्मात्रस्यापेक्षया अहंतत्त्वं व्यापकं सूक्ष्मं च वर्तते, अहंकारस्यापेक्षया बुद्धिर्वा महत्तत्त्वं तथा महत्तत्त्वस्यापेक्षया मूलप्रकृतिः व्यापिका सूक्ष्मा च वर्तते, मूलप्रकृतेर्व्यापकताया उपमा नास्ति । प्रकृतिरेकान्तभावे अव्यक्ता वर्तते, परन्तु प्रकृतितः समुत्पन्नानि महत्तत्त्वादीनि व्यक्तानि सन्ति, इदमेव पुराणेषु प्रकृतिपरिणामस्य वर्णनं सर्वाणि पुराणानि कुर्व्वन्ति तद्यथा -

तस्माच्च विपर्ययात्सिद्धं साक्षित्वमस्य पुरुषस्य ।
कैवल्यं माध्यस्थ्यं द्रष्टृमकर्तृभावश्च[३] ।।

---

[1] श्री. भा. ३।२६।२४-२५

[2] सांख्यकारिका-१६

[3] सांख्यकारिका-१९

प्रकृतिशब्दस्य प्रयोगो विभिन्नेषु लिङ्गेषु पृथक्पृथक् प्राप्तो भवति । विभिन्नेषु लिङ्गेषु प्राप्तत्वादपि नपुंसकलिङ्गेपि दृष्टव्योस्ति तद्यथा -

१. अचेतनम् ।

२. अजा ।

३. क्षेत्रम् ।

४. ज्ञानम् ।

५. जगत् ।

६. कर्त्री ।

७. बहुप्रजाः ।

यत्रैकमेव तत्त्वमद्वैतस्य विश्लेषणं करोति, तत्र प्रकृतिपुरुषौ समानौ वर्तेते, यत्राद्वैतस्य स्थितिरन्यथा भवति, तदा पुरुषानन्तरं प्रकृतेर्महत्तत्त्वमन्यथा दृश्यते, अतः प्रकृतिरेव स्वभावो योनिश्च वर्तते । पुरुषो नाम जीवः केवलं कृतस्य अभिमानेन स्वं जानाति, तदा सूक्ष्मशरीरस्य माध्यमेन विभिन्नासु योनिषु मोक्षपर्यन्तं भ्रमति तथा क्लेशसहनं करोति, यथा - वायुपुराणं ब्रह्माण्डपुराणमनेन प्रकारेण वर्ण्णनं करोति तद्यथा -

**प्रकृत्यां चैव तत्सर्वं पुण्यं पापं प्रतिष्ठति ।**
**योन्यवस्था स्वभावे च देहिनां तु निषिध्यते ।।**
**अव्यक्तस्थानि तान्येव पुण्यपापानि जन्तवः ।**
**योजयन्ति पुनर्देहं देहान्यत्वे तथैव च ।।**
**धर्माधर्मौ तु जन्तूनां गुणमात्रात्मकावुभौ ।**
**करणैः स्वैः प्रलीयेते कायत्वेनेह जन्तुभिः[१] ।।**
**सुचेतनाः प्रलीयन्ते क्षेत्रज्ञाधिष्ठिता गुणाः ।**
**सर्गे च प्रतिसर्गश्च संसारे चैव जन्तवः ।**
**संयुज्यन्ते वियुज्यन्ते करणैः संचरन्ति च[१] ।।**

[1] श्री. भा. पुराणम्-११।२४।१७-१८

इदमेव मतं स्कन्दपुराणस्य माहेश्वरखण्डे वर्तते, तथा श्रीमद्भागवतं पुराणमपि कथयति यद् –

**यस्तु यस्यादिरन्तश्च स वै मध्यं च तस्य सन् ।**
**विकारो व्यवहारार्थो यथा तैजसपार्थिवः ॥**
**यदुपादाय पूर्वस्तु भावो विकुरुते माम् ।**
**आदिरन्तो यदा यस्य तत्सत्यमभिधीयते[२] ॥**

अस्याः प्रकृतेर्लक्षणं सर्वत्र पृथक्पृथग् वर्तते, तेषु वायुपुराणमनेन प्रकारेण कथयति तद्यथा –

**अव्यक्तकारणं यत्तु नित्यं सदसदात्मकम् ।**
**प्रधानं प्रकृतिं चैव यमाहुस्तत्त्वचिन्तकाः ॥**
**गन्धवर्णरसैर्हीनं शब्दस्पर्शविवर्जितम् ।**
**अजातं ध्रुवमक्षय्यं नित्यं स्वात्मन्यवस्थितम् ॥**
**जगद्योनिं महद्भुतं परं ब्रह्मन् सनातनम् ।**
**विग्रहं सर्वभूतानामव्यक्तमभवत्किल ॥**
**अनाद्यन्तमजं सूक्ष्मं त्रिगुणं प्रभवाप्ययम् ।**
**असाम्प्रतमविज्ञेयं ब्रह्माग्रे समवर्तत ॥**
**अस्यात्मा सर्वमिदं व्याप्तमासीत्तमोमयम् ।**
**गुणसाम्ये तदा तस्मिन्गुणभावे तमोमये[३] ॥**
**गुणसाम्ये तदा तस्मिन्पुरुषे चात्मनि स्थिते[४] ॥**

---

1 ब्रह्माण्डपुराणम्-४।३।२४

2 वायुपुराणम्-४।१०२।५०-५२

3 वायुपुराणम्-१।४।१७-२२

4 भविष्यपुराणम्-२।७७।२

अतः प्रकृतिपुरुषद्वयं सनातनकालीनमस्ति, सृष्टिरित्यादीनां कारणं प्रकृतिपुरुषद्वयं वर्तते । प्रकृतिपुरुषद्वयमनाद्यजातमस्ति । अनेन प्रकारेण मम शोधमहानिबन्धस्य चतुर्थे प्रकरणे पुराणेषु सांख्यीयतत्त्वपरिगणनम् , प्रमाणविषयविवेचनम् , सत्कार्य्यवादः, गुणनिरूपणम् , व्यक्ताव्यक्तभिन्नधर्म्माः, प्रकृतिपरिणामः-इत्यादीनां विषयाणां सर्व्वाणि पुराणान्यालोड्य विमर्शः कृतो वर्तते, विस्तारभयादत्र न प्रस्तूयते ।